① पेज = 3 न्याय दर्शन

27 × 12.5 × 0.1 c.m

अपूर्ण

ब्रह्मक्ति सुरोवार्त्तिगवपरजतशाक्रावींकारजतेद्दा

... ...

घीपेतत त्रापिपक्रव्या मिदंरजतं नेदरजंतमित्यन

- नयोरास्तिक

Note - पेज छूटे हुए है।

---

② विषय - पुराण

पेज - 3

27.3 × 13.5 × 0.1 c.m.

अपूर्ण

पुण्यतीर्थो विह्नगंगादिः पुण्यवतीर्थशिरोश्रयाचाश्रम

... ...

अतिथिपूजयेद्यस्तुश्रांतं पादपृ मानसं संपूजगो

-शंततेन

पुण्यतीर्थो विच्छिन्नगंगादिः पुण्यतीर्थशोभया वाश्रमस्यैव तस्य तपोतिशयजनकत्वे हेतुरु
पन्यस्तः मृगादीनामन्योन्यवैरत्यागेन निर्भयानां विश्रब्धो योनिनादत्तेना हिंसानुष्ठान
सिद्धिर्दर्शिता तथा च योगशास्त्रे पतंजलिर्यमनियमादीनां क्रमेण सिद्धिलिंगानि सूत्र
यन्नहिंसासिद्धिं सूत्रयामास तात्सन्निधौ वैरत्याग इति पूर्वं महर्षयोऽत्र तपश्चरंतः एके के
वा देवात्वं स्वस्वकाले निर्ममिरे तैः सर्वैरेव तत्त्वमस्याश्रमस्य तपोतिशयहेतुतायां सर्वे
सम्प्रतिपत्तेस्तच्चिह्नं अथवा चंद्रसूर्यादयो देवाः पूर्वस्मिन्जन्मनि मनुष्याः संतोत्रैव ना
नाविधेषु विस्त्वायतनेषु तपस्तप्त्वा देवत्वं लेभिरे इति विवक्षया देवतानामं किं तैराय
तनैराकृतत्वमुक्तं यतस्तादयः पूर्वजन्मानुष्ठिततपः फलं देवयोनित्वमनुभवंतोप्यत्रा
गत्यैतत्संदीयतपोतिशयं हृष्यंतो नृत्यंति गायंति च अनेन देवैरप्यंथनियतत्वमाश्रमस्य त्य
दर्शितं युक्तं चैतत् तद्देवत्वं जन्मनामुष्ठितमस्य फलं स्यात्र संपादयितुं शक्यत्वात् अथवा य
द्वादयो रुमनुत्तवस्संतोत्रागत्य साधनत्वेन नृत्यगीताभ्यामीश्वरं भजंते अतएव यात्र

वल्क्येनेदमुक्तं वीणावादनतत्वज्ञःश्रुतिजातिविशारदः तालज्ञश्चाप्रयासेनमोक्षमार्गंनि
गच्छतीति ७ गुरुषूपसत्तिसद्भावानुष्ठेयंप्रकारविशेषंदर्शयति तस्मिन्निति तस्मिन्नि

तस्मिन्नृषिसभामध्येशक्तिपुत्रंपराशरम् सुखासीनंमहातेजा
मुनिमुख्यगणावृतम् ८ कृताञ्जलिपुटोभूत्वाव्यासस्तुऋषि
भिःसह प्रदक्षिणाभिवादैश्चस्तुतिभिःसमपूजयत् ९

स्याश्रमोक्तिः वक्ष्यमाणधर्माणामशेषमुनिसंमतत्वंद र्शयितुमृषिसभेत्युक्तं ऋषि
ष्वपिविशेषतःस्मृतिकाराणांगोत्रप्रवर्तकानांचात्रयाज्ञवल्क्यादीनांसंमतमेवेति
विवक्षित्वाह मुनिमुख्येति नकेवलेनतपोवलेनपराशरस्यमहिमा किंतुविशिष्ट
जन्मनापीत्याह शक्तिपुत्रमिति अयंचमहिमापराशरशब्दनिर्वचनपर्यालोचन
याविस्पष्टमवगम्यते तच्चनिर्वचनंमहद्भिरुदाहृतं पराकृताःशरायस्माद्दुष्टमा
नांवधा[illegible]र्थिनाम् अतःपराशरोनामऋषिरुक्तोमनीषिभिः पेरस्यका

पुरुषार्थत्वेन योग्यत्वाद्भावनायास्तस्य च स्वर्गस्य साधनाकांक्षायां यागः करण
त्वेनान्वेति तच्च करणं साध्यस्वरूपत्वात्स्वनिष्पादकं सिद्धं द्रव्यं देवतां चेति
कर्तव्यत्वेन गृह्णाति ततो यागांगी देवतानुगतं गरावं च सतिनातिष्ठिवद्देवता
यागेनाराध्यते यानुश्रुतिः तद्रूपत्वेन मितिना सोऽस्वार्थेनात्म यथैवतो प्रत्यक्षादिवि
रोधान्न तु केचिद्विग्रहवती देवता हविर्भुक्त्वा तृप्ता फलं प्रयच्छतीति प्रत्यक्षेणो
पलभ्यते अनुत तदभावः प्रत्यक्षेणायोग्यानुपलब्ध्या वा प्रमीयते किंचाश्वमे
धे गोदंष्ट्राभ्यां मंडूकान्दतैरित्याद्यश्चावयवानां दंष्ट्रादिद्रव्याणां हविषां भोक्तृ
त्वेन गोमंडूकादयस्तिर्यञ्चो देवताविशेषाः श्रूयंते न च तेषां फलदातृत्वं सं
भाव्यते ओषधिभ्यः स्वाहा वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहेत्यादावचेतना
नां ओषधिवनस्पतिनद्वयवानां देवतात्वं श्रूयते तत्र कुतो हविर्भोक्तृत्वं
कुतस्तरां तृप्तिः कुतस्तमां फलदानं तस्माद्विग्रहादिमत्तां देवतानामभावा

न्न देवानां प्रसादो यागस्य फलद्वारं स्यात् किंतु स्वयमाराफलसाधनत्वान्यथानुप
त्तिकल्प्यमपूर्वं तद्वारमभ्युपगम्यते स पि वेदेषु सर्वस्यैव फलद्वारत्वमवश्यं
कर्तव्यं मंत्रार्थवादेतिहासपुराणेषु देवतानामपि तपस्करणाकत्वकेष्ठानवत्रा
स्त्रादिमंत्रप्रयोगेभ्यः समीहितसिद्ध्यनुकीर्तनात् तस्मान्न देवः फलप्रद इति
सिद्धं औपनिषदस्तु ईश्वरस्य फलदातृत्वमन्वंते तथाहि तदीयेशास्त्रे तृ
तीयाध्याये विचारितं किं धर्मः फलं ददाति आहोस्विदीश्वर इति संशयः त
त्र मीमांसकोक्तन्यायेन धर्मः फलप्रद इति पूर्वः पक्षः सिद्धांतस्तु किं धर्मो
न्यानधिष्ठित एव फलदः किं वा केन चिच्चेतनेनाधिष्ठितः नाद्यः अचेतनस्य
तारतम्यानभिज्ञस्य यथोचितफलदातृत्वायोगात् द्वितीयेतु येनाधिष्ठितः
स एव फलदातास्तु नचैवं धर्मस्य वैयर्थ्यमिति शंकनीयं वैषम्यनैर्घृण्यप
रिहाराय धर्मापेक्षणात् असति धर्मे कांश्चिदुत्तमं सुखं कांश्चिन्न धर्मे कां

ष्टिदं धर्मं प्रापयन्नीश्वरः कथं विषमो न भवेत् कथं वा चित्रेऽङ्गः एवं प्रापयन्नि घृणो
न भवेद्धर्माधर्मानुसारेण तत्प्रापकत्वात् पितृराजादीनामिव न वैषम्यनैर्घृण्ये
प्राप्नुतः नहि दुष्टशिक्षां शिष्टपालनं च कुर्वतां राजादीनां वैषम्यनैर्घृण्ये विद्ये
ते षडङ्गं गोमड्कादीनां तिरश्चामोषधीवनस्पत्यादीनां च स्थावराणां फ
लप्रदत्वमयुक्तमिति तत्रैवास्तु ईश्वरस्य फलदातृत्वे कः प्रत्यूहः यदपि
तत्र एवैनमिन्द्रः प्रजया पशुभिस्तर्पयतीति तत्रापीन्द्रदेवतायामवस्थितो
न्तर्यामी फलप्रदत्वेन विवक्षितः अन्तः प्रविष्टः शास्ता जनानामिति श्रुतेः त
स्मादीश्वरप्रसादरूपव फलद्वारं न च जैमिनीयवैयासिकयोर्मतयोः परस्प
रं विरोधः विवक्षाविशेषेणान्तसमाधानात् यथा देवदत्तस्यैव पाचकत्वेपि
सम्यगभिज्वालनस्य विवक्षितत्वात्काष्ठानि पचन्तीति व्यवहारः किं न स्या
त् तस्मादविरोधात्फलप्रदो जगदीश्वर एक एव सर्वत्र पूजनीयतया वदन्त्यलम्

तिवृसंगेन इति देवतास्वरूपनिरूपणप्रकरणम् ॥ अतिथेर्लक्षणं स्वयमेव वक्ष्यति उभ
योः पूजनप्रकारमुपरितनश्लोके निरूपयामः देवतातिथिपूजको नावसीदतीत्युक्ते
रपूजया वसीदतीत्यवगम्यते तथा च कूर्मपुराणे यो मोहादथवालस्यादकृत्वा देव
तार्चनं भुंक्ते स याति नरकं घोरं शूकरेष्वभिजायते अकृत्वा देवपूजां च महायज्ञान्द्विजो
त्तमः भुंजीत चेत्स मूढात्मा तिर्यग्योनिं च गच्छतीति मार्कंडेयः अतिथिर्यस्य भग्ना
शो गृहात्प्रतिनिवर्तते स तस्य दुष्कृतं दत्वा पुण्यमादाय गच्छतीति देवलोपि अति
थिर्हृदमभ्येत्य यस्य प्रतिनिवर्तते अप्रसन्नकृतो निराशश्च तस्य यो हन्ति तत्कुलमिति
पूजायां तु न केवलमेव पापाभावः किं त्वभ्युदयोपि तथा च विष्णुधर्मोत्तरे ये वयं
ति महाविष्णुं शंखचक्रगदाधरं सर्वपापविनिर्मुक्ता ब्रह्मलोकं प्रविशंति ते इति कूर्म
पुराणे वेदाभ्यासोन्वहं शक्त्या महायज्ञक्रियाक्षमा नाशयंत्याशु पापानि देवानो
मर्चनं तथेति मनुरपि अतिथिं पूजयेद्यस्तु श्रांतं पादप्रमानसं सत्संगेनाशांतेनेन